# Dasibhih Karaniya Shri Krishna Stuti

# દાસીભિઃ કરણીયા શ્રીકૃષ્ણસ્તુતિઃ

## Document Information

Text title : Dasibhih Karaniya Shri Krishna Stuti

File name : dAsIbhiHkaraNIyAshrIkRRiShNastutiH.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, stuti

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 413/41-63||

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2026

*sanskritdocuments.org*

# દાસીભિઃ કરણીયા શ્રીકૃષ્ણસ્તુતિઃ

તણ્ડુલૈર્વિષ્ણુપાદાબ્જવારિમિશ્રજલૈઃ શુભૈઃ ।
સ્નાયાત્તથાઽર્ચયેત્ કામરૂપં કૃષ્ણનરાયણમ્ ॥ ૪૧॥

રતિં કામં પ્રતિષ્ઠાપ્ય રાધાં કૃષ્ણં તુ કાનકમ્ ।
લક્ષ્મીં નારાયણં સ્વર્ણં સંસ્થાપ્ય પૂજયેત્તુ સા ॥ ૪૨॥

કામાય પાદૌ સમ્પૂજ્ય જઙ્ઘે વૈ મોહકારિણે ।
મેઢ્રં કન્દર્પનિધયે કટિં પ્રીતિમતે નમઃ ॥ ૪૩॥

નાભિં સૌખ્યસમુદ્રાય રામાય ચ તથોદરમ્ ।
હૃદયં હૃદયેશાય સ્તનાવાહ્લાદકારિણે ॥ ૪૪॥

ઉત્કણ્ઠાયેતિ વૈકુણ્ઠમાસ્યમાનન્દકારિણે ।
વામાઙ્ગં પુષ્પચાપાય પુષ્પબાણાય દક્ષિણમ્ ॥ ૪૫॥

માનસાયેતિ વૈ મૌલિં વિલોલાયેતિ મૂર્ધજમ્ ।
સર્વાત્મને કૃષ્ણનારાયણાત્મને પ્રસેવિને ॥ ૪૬॥

કાન્તરૂપાય ચક્રાદિધારિણે પરમાત્મને ।
નમો નારાયણાયેતિ કામદેવાત્મને નમઃ ॥ ૪૭॥

કામપિત્રે કામદેવનિવાસાય ચ તે નમઃ ।
કામમોક્ષકરાયાઽર્તિહરાય હરયે નમઃ ॥ ૪૮॥

કામબન્ધનકારાય કામબન્ધનહારિણે ।
કૃષ્ણ કૃષ્ણ કામ કૃષ્ણ મોક્ષદાય ચ તે નમઃ ॥ ૪૯॥

અસ્માકં ત્વં પતિઃ કૃષ્ણ નાન્યોઽસ્તિ ત્વાદૃશઃ પતિઃ ।
અન્યે સ્વાર્થાઃ પતયસ્તે વયં સ્વાર્થાશ્ચ યોષિતઃ ॥ ૫૦॥

ત્વં પરાર્થઃ પરબ્રહ્મ ગૃહાણાઽસ્માન્નિજે કરે ।
પાતિવ્રત્યં ત્વયિ ચાસ્તુ નાન્યત્ર ક્ષણદેષુ વૈ ॥ ૫૧॥

ક્ષણદેષુ ભવાનાસ્તે ભવાનેવ પતિઃ પ્રભો! ।
તારયાઽસ્માન્ ભવવાહાત્ કૃષ્ણવાહે નય પ્રભો ॥ ૫૨॥

નાર્યઃ કામકૃતે સૃષ્ટાઃ ભવાન્ કામરૂપો હિ નઃ ।
બીજરૂપો હરિઃ કૃષ્ણો બાલરૂપો ભવાન્ મતઃ ॥ ૫૩॥

પ્રેમરૂપો લિઙ્ગરૂપો ભવાનેવ મતો હિ નઃ ।
મા ભક્તાનાં યોષિતાં તે કિઙ્કરીણાં દુરીતકમ્ ॥ ૫૪॥

પણ્યત્વે ચ કદાચિદ્વૈ સ્પૃશત્વસ્માઁસ્તવ પ્રિયાઃ ।
યત્તુર્મો વામભાગસ્થાઃ શર્મ કર્મ સુખાવહમ્ ॥ ૫૫॥

અર્પયામો ભવત્યેવ નિર્ગુણં તન્નિવર્તતામ્ ।
એવં કૃષ્ણાર્પણં લક્ષ્મિ! કાર્યં વારસ્ય યોષિતા ॥ ૫૬॥

પણ્યસ્ત્રીભિસ્તથા દાસ્યા કાર્યં કૃષ્ણાર્પણં હિ તત્ ।
અથ લક્ષ્મીં રાધિકાં ચ રતિં મત્વા સમર્ચયેત્ ॥ ૫૭॥

નમઃ પુષ્ટ્યૈ નમસ્તુષ્ટ્યૈ નમઃ સર્વાર્થસમ્પદે ।
અનઙ્ગજનનીં વન્દે કામપત્ન્યૈ નમો નમઃ ॥ ૫૮॥

કામાત્મિકાયૈ સુન્દર્યૈ કૃષ્ણકાન્ત્યૈ ચ તે નમઃ ।
આનન્દાત્મકરૂપિણ્યૈ તારિણ્યૈ તે નમો નમઃ ॥ ૫૯॥

એવં પ્રાતઃ સદા પણ્યપ્રમદા શ્રીહરિં પતિમ્ ।
શ્રીપતિં પૂજયેત્ સ્વામિભાવેન મોક્ષણં વ્રજેત્ ॥ ૬૦॥

ગન્ધૈર્માલ્યૈસ્તથા ધૂપૈર્નૈવેદ્યૈર્જલદીપનૈઃ ।
કામિની ચાપ્સરસશ્ચ પૂજયેચ્છ્રીજનાર્દનમ્ ॥ ૬૧॥

અન્નદાનં વસ્ત્રદાનં દ્રવ્યદાનં દ્વિજાતયે ।
સાધવે બ્રહ્મશીલાય દદ્યાચ્ચ બ્રહ્મચારિણે ॥ ૬૨॥

તસ્મૈ કૃષ્ણાયાઽર્પયામિ શ્રીકૃષ્ણઃ પ્રીયતાં મમ ।
ઇતિ પૂજાં કારયેદ્વા કુર્યાત્ પુણ્યપ્રદાં સતી ॥ ૬૩॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૪૧૩-અધ્યાયાન્તર્ગતં
દાસીભિઃ કરણીયા શ્રીકૃષ્ણસ્તુતિઃ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૪૧૩/૪૧-૬૩ ॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 413/41-63..

Proofread by PSA Easwaran

*Dasibhih Karaniya Shri Krishna Stuti*
pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*